# Shri Nrisimhabhujangaprayata Stotram

# શ્રીનૃસિંહભુજઙ્ગપ્રયાતસ્તોત્રમ્ ૨

## Document Information

Text title : Shri Nrisimhabhujangaprayata Stotram

File name : nRRisiMhabhujangaprayAtastotram2.itx

Category : vishhnu, dashAvatAra, bhujanga, stotra

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 4, 2025

*sanskritdocuments.org*

Shri Nrisimhabhujangaprayata Stotram

# શ્રીનૃસિંહભુજઙ્ગપ્રયાતસ્તોત્રમ્ ૨

ૐ નમઃ સર્વગીર્વાણકોટીરકોટિસ્ફુરદ્રત્નનિર્યલનીરાજિતામ્ ।
શરચ્ચન્દ્રકોટિપ્રભાભાસુરાઙ્ગં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહમ્ ॥ ૧॥

સભાસ્તમ્ભનિર્ભેદનાવિર્ભવન્તં ધ્વનિસ્તમ્ભિતાશેષદં ભોલિકેલિમ્ ।
પ્રચણ્ડસ્ફુરત્કાણ્ડચણ્ડાટ્ટહાસં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહમ્ ॥ ૨॥

હિરણ્યાક્ષવક્ષોગણાધ્યક્ષવક્ષો શિલા ક્ષોદદક્ષોગ્રજાયં નખાગ્રમ્ ।
પ્રતિસ્પર્ધિદૈત્યેન્દ્રમત્તેભસિંહં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહમ્ ॥ ૩॥

કિરાટાન્તસદ્રત્નદૈદીપ્યમાનં જ્વલત્તારહારાવલિં ચારુકણ્ઠમ્ ।
ક્વણત્કઙ્કણોદારકેયૂરહારં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહમ્ ॥ ૪॥

ચલચ્ચઞ્ચલાકારચેચિત્કરાગ્રં જ્વલત્કીલકાલાનલાભીમનેત્રમ્ ।
મહોદગ્રદંષ્ટ્રાકરાલોગ્રવક્ત્રં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહ ॥ ૫॥

રમાવક્ત્રપૂર્ણેદુસન્દર્શનૈકં પ્રશાન્તોદ્ભટાટોપકોપાવલેયમ્ ।
સમસ્તાગમસ્તોમસંસ્તૂયમાનં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહમ્ ॥ ૬॥

ત્રયીમસ્તકન્યસ્તસીમન્તરત્નં મહાયોગિહૃત્પુણ્ડરીકાન્તનેત્રમ્ ।
પરિત્રાણલોકત્રયં દેવરનં નમસ્કુર્મહે વીરલક્ષ્મીનૃસિંહમ્ ॥ ૭॥

નમસ્તે નમસ્તે સદાભક્તબન્ધો નમસ્તે નમસ્તે કૃપાસારસિન્ધો ।
નમસ્તે નમસ્તે સદાવીરલક્ષ્મીનૃસિંહામરાધીશ દેવ પ્રસીદ ૐ ॥ ૮॥

ભુજઙ્ગપ્રયાદષ્ટકં ત્વિષ્ટકામં પઠન્ શ્રીનૃસિંહાઙ્કિતસ્તોત્રમેતત્ ।
સતીત્વાર્થવદ્ધારરાશીસમગ્રં સમગ્રાયુરારોગ્યમૈશ્વર્યમેતિ ॥ ૯॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં નૃસિંહભુજઙ્ગપ્રયાતસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Shri Nrisimhabhujangaprayata Stotram*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*